# श्रीमद् भागवत रसिक कुटुंब

## महालक्ष्म्यष्टकम्

**इंद्र उवाच**

नमस्तेऽस्तु महामाये, श्रीपीठे सुरपूजिते ।
शंखचक्रगदाहस्ते, महालक्ष्मि नमोऽस्तु ते ॥1॥

नमस्ते गरुडारूढे, कोलासुरभयंकरि ।
सर्वपापहरे देवि, महालक्ष्मि नमोऽस्तु ते ॥2॥

सर्वज्ञे सर्ववरदे, सर्वदुष्टभयंकरि ।
सर्वदुःखहरे देवि, महालक्ष्मि नमोऽस्तु ते ॥3॥

सिद्धिबुद्धिप्रदे देवि, भुक्तिमुक्तिप्रदायिनी ।
मंत्रपूते सदा देवि, महालक्ष्मि नमोऽस्तु ते ॥ 4 ॥

आद्यंतरहिते देवि, आद्यशक्तिमहेश्वरि ।
योगजे योगसंभूते, महालक्ष्मि नमोऽस्तु ते ॥ 5 ॥

स्थूलसूक्ष्ममहारौद्रे, महाशक्तिमहोदरे ।
महापापहरे देवि, महालक्ष्मि नमोऽस्तु ते ॥ 6 ॥

पद्मासनस्थिते देवि, परब्रह्मस्वरूपिणी ।
परमेशि जगन्मातर्-महालक्ष्मि नमोऽस्तु ते ॥ 7 ॥

श्वेतांबरधरे देवि, नानालंकार भूषिते ।
जगत्स्थिते जगन्मातर्-महालक्ष्मि नमोऽस्तु ते ॥ 8 ॥

महालक्ष्म्यष्टकं स्तोत्रं(यँ), यः(फ्) पठेद्भक्तिमान्नरः ।
सर्वसिद्धिमवाप्नोति, राज्यं प्राप्नोति सर्वदा ॥ 9 ॥

एककाले पठेन्नित्यं, महापापविनाशनम् ।
द्विकालं(यँ) यः(फ्) पठेन्नित्यं(न्), धनधान्यसमन्वितः ॥ 10॥

त्रिकालं(यँ) यः(फ्) पठेन्नित्यं, महाशत्रुविनाशनम् ।
महालक्ष्मीर्भवेन्नित्यं, प्रसन्ना वरदा शुभा ॥ 11 ॥

॥ इति इन्द्रकृतं महालक्ष्म्यष्टकम् संपूर्णम् ॥